শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

## শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে অরণ্যকাণ্ডে

# ॥ সপ্তপঞ্চাশঃ সর্গঃ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

# ॥ সপ্তপঞ্চাশঃ সর্গঃ ॥

## শ্রীরামস্য মৃগং হৎৱা নিৱর্তনং মার্গেঽপশকুনং দৃষ্টৱা তস্য চিন্তা তত্র মিলিতং লক্ষ্মণমুপালভ্য সীতাৱিষযকসঙ্কটস্য তেনাশঙ্কনম্

রাক্ষসং মৃগরূপেণ চরন্তং কামরূপিণম্।
নিহত্য রামো মারীচং তূর্ণং পথি ন্যৱর্তত॥ **3.57.1** ॥

তস্য সন্ত্বরমাণস্য দ্রষ্টুকামস্য মৈথিলীম্।
ক্রূরস্ৱনোঽথ গোমাযুর্ৱিননাদাস্য পৃষ্ঠতঃ॥ **3.57.2** ॥

স তস্য স্ৱরমাজ্ঞায দারুণং রোমহর্ষণম্।
চিন্তযামাস গোমাযোঃ স্ৱরেণ পরিশঙ্কিতঃ॥ **3.57.3** ॥

অশুভং বত মন্যেঽহং গোমাযুর্ৱাশ্যতে যথা।
স্ৱস্তি স্যাদপি ৱৈদেহ্যা রাক্ষসৈর্ভক্ষণং ৱিনা॥ **3.57.4** ॥

মারীচেন তু ৱিজ্ঞায স্ৱরমালক্ষ্য মামকম্।
ৱিক্রুষ্টং মৃগরূপেণ লক্ষ্মণঃ শৃণুযাদ্ যদি॥ **3.57.5** ॥

স সৌমিত্রিঃ স্ৱরং শ্রুৎৱা তাং চ হিৎৱাথ মৈথিলীম্।
তযৈৱ প্রহিতঃ ক্ষিপ্রং মৎসকাশমিহৈষ্যতি॥ **3.57.6** ॥

রাক্ষসৈঃ সহিতৈর্নূনং সীতাযা ঈপ্সিতো ৱধঃ।
কাঞ্চনশ্চ মৃগো ভূৎৱা ৱ্যপনীযাশ্রমাত্তু মাম্॥ **3.57.7** ॥

দূরং নীৎৱাথ মারীচো রাক্ষসোঽভূচ্ছরাহতঃ।
হা লক্ষ্মণ হতোঽস্মীতি যদ্বাক্যং ৱ্যাজহার হ॥ **3.57.8**॥

অপি স্বস্তি ভৱেদ্ দ্বাভ্যাং রহিতাভ্যাং মযা ৱনে।
জনস্থাননিমিত্তং হি কৃতৱৈরোঽস্মি রাক্ষসৈঃ॥ **3.57.9**॥

নিমিত্তানি চ ঘোরাণি দৃশ্যন্তেঽদ্য বহূনি চ।
ইত্যেৱং চিন্তযন্ রামঃ শ্রুৎৱা গোমাযুনিঃস্বনম্॥ **3.57.10**॥

নিৱর্তমানস্ত্বরিতো জগামাশ্রমমাত্মৱান্।
আত্মনশ্চাপনযনং মৃগরূপেণ রক্ষসা॥ **3.57.11**॥

আজগাম জনস্থানং রাঘৱঃ পরিশঙ্কিতঃ।
তং দীনমানসং দীনমাসেদুর্মৃগপক্ষিণঃ॥ **3.57.12**॥

সৱ্যং কৃৎৱা মহাত্মানং ঘোরাংশ্চ সসৃজুঃ স্বরান্।
তানি দৃষ্টৱা নিমিত্তানি মহাঘোরাণি রাঘৱঃ।
ন্যৱর্ততাথ ৎৱরিতো জৱেনাশ্রমমাত্মনঃ॥ **3.57.13**॥

ততো লক্ষ্মণমাযান্তং দদর্শ ৱিগতপ্রভম্।
ততোঽৱিদূরে রামেণ সমীযায স লক্ষ্মণঃ॥ **3.57.14**॥

ৱিষণ্ণঃ সন্ ৱিষণ্ণেন দুঃখিতো দুঃখভাগিনা।
স জগর্হেঽথ তং ভ্রাতা দৃষ্টৱা লক্ষ্মণমাগতম্॥ **3.57.15**॥

ৱিহায সীতাং ৱিজনে ৱনে রাক্ষসসেৱিতে।
গৃহীৎৱা চ করং সৱ্যং লক্ষ্মণং রঘুনন্দনঃ॥ **3.57.16**॥

উৱাচ মধুরোদর্কমিদং পরুষমার্তৱৎ।
অহো লক্ষ্মণ গর্হ্যং তে কৃতং যৎ ৎৱং ৱিহায তাম্॥ **3.57.17**॥

সীতামিহাগতঃ সৌম্য কচ্চিৎ স্বস্তি ভৱেদিতি।
ন মেঽস্তি সংশযো ৱীর সর্ৱথা জনকাত্মজা॥ **3.57.18**॥

ৱিনষ্টা ভক্ষিতা ৱাপি রাক্ষসৈর্ৱনচারিভিঃ।
অশুভান্যেৱ ভূযিষ্ঠং যথা প্রাদুর্ভৱন্তি মে॥ **3.57.19**॥

অপি লক্ষ্মণ সীতাযাঃ সামগ্র্যং প্রাপ্নুযামহে।
জীৱন্ত্যাঃ পুরুষৱ্যাঘ্র সুতাযা জনকস্য ৱৈ॥ **3.57.20**॥

যথা ৱৈ মৃগসঙ্ঘাশ্চ গোমাযুশ্চৈৱ ভৈরৱম্।
ৱাশ্যন্তে শকুনাশ্চাপি প্রদীপ্তামভিতো দিশম্।
অপি স্বস্তি ভৱেৎ তস্যা রাজপুত্র্যা মহাবল॥ **3.57.21**॥

ইদং হি রক্ষো মৃগসন্নিকাশং
প্রলোভ্য মাং দূরমনুপ্রযাতম্।
হতং কথঞ্চিন্মহতা শ্রমেণ
স রাক্ষসোঽভূন্ম্রিযমাণ এৱ॥ **3.57.22**॥

মনশ্চ মে দীনমিহাপ্রহৃষ্টং
চক্ষুশ্চ সৱ্যং কুরুতে ৱিকারম্।
অসংশযং লক্ষ্মণ নাস্তি সীতা
হৃতা মৃতা ৱা পথি ৱর্ততে ৱা॥ **3.57.23**॥

॥ ইত্যার্ষে শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে অরণ্যকাণ্ডে সপ্তপঞ্চাশঃ সর্গঃ ॥